International Journal of Sanskrit Research 2016; 2(5): 31-32

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(5): 31-32
© 2016 IJSR
www.anantaajournal.com
Received: 11-07-2016
Accepted: 12-08-2016

**संजयकुमार**
शोधच्छात्र: सर्वदर्शनविभाग:
श्री.ला.ब.शा.रा.सं.विद्यापीठम्

**Correspondence**
**संजयकुमार**
शोधच्छात्र: सर्वदर्शनविभाग:
श्री.ला.ब.शा.रा.सं.विद्यापीठम्

# न्यायसिद्धान्तमञ्जर्या प्रत्यक्षप्रमाणविमर्शः

**संजयकुमार**

प्रमाणाधीनमिति प्रमाणं निरूप्यते। तत्र प्रमायाः करणं प्रमाणं। प्रमा च यर्थाथानुभवः। तदाहुराचार्याः यथार्थानुभवो मानमिति। किमिदं यथार्थ किञ्च अनुभवत्वम् उच्यते तद्वति तदवगाहित्वं याथार्थ्यम्। भवति हि राजते इदं रजतम् इति ज्ञानं च न रजतत्तवति तदवगाहीति न यथार्थम् नन्वेवं रजते इदं रजतं नवाः इति संशयोऽपि प्रमा स्यात् इति चेत्? सत्यम्। रजतत्वांशे प्रमैव तद्वति तदनुभवः तत्प्रमेति प्रामाणिकाः। शाखावच्छेदेन कपिसंयोग वति वृक्षे मूले वृक्षकपिसंयोग। इति प्रत्ययोऽपि प्रमा स्यात् कपि संयोगवति वृक्षे तदवगाहित्वादिति चेत्? न। वृक्षे कपिसंयोग प्रत्ययः प्रमैव। मूले अवच्छेदकत्व[1] प्रत्ययस्तु न तथा तस्य तदनवच्छेदकत्वात्। स्मृतिभिन्नज्ञान सत्वं जातिविशेषो[2] वा अनुभवामीति प्रतीतेः बाधकं विना जातिविषयत्वात्।

कारणत्वञ्च व्यापारवदसाधारणकारणत्वम्। घटं प्रति कपाल संयोग वारणाय व्यापारवद् इति। ईश्वरज्ञानवारणाय असाधारणेति। नन्वेवं ज्ञान प्रति आत्माअपि करणं स्यात्, संयोगस्य व्यापारस्य सत्वान् तज्जन्यत्वे सति तज्जन्यजनको व्यापारः भवति च आत्म संयोगः आत्मजन्यज्ञान जनकश्चेति चेत्? स्यादेव उपाधीनां करणत्वादीनां भेदाञ्च व्यवहारभेदः। अत एव विवक्षातः कारविभक्तयो नाना भवन्तीति शाद्धिकाः। अत एव आत्मा नम् आत्मना वेत्सीः इति तृतीया। शिवादित्यमिश्रास्तु करणाद्याकारानुगतः मतेः करणत्वादिकम् अखण्डोपाधिरूप[3] सामान्यम् अङ्गीचक्रुः तच्च प्रमाणं चतुर्विधमित्याह भगवान् सूत्रकाररूप प्रमाणकरणं प्रत्यक्षम् साक्षात्कारत्वञ्च साक्षातकरोमीति अनुभवसाक्षिको जातिविशेषः।

न चेयम् इन्द्रियजन्यज्ञानत्वविषया ज्ञानमात्रस्य मनोरूपेन्द्रिय जन्यत्वात् इन्द्रिया प्रतीतावपि तथा प्रतीतेश्च नापि चाक्षुषत्वादि जातिविषया अनुगतत्वात्।

यद्वा जन्यधीजन्य मात्रवृत्तिजातिशून्यत्वं तत् भवति हि जन्यधीजन्यमात्रवृत्यनुमितित्वादि तच्छून्यत्वं साक्षात्कारत्वम्।

न च निधिध्यासन जन्यमात्रवृत्तिमोक्षजनकतावच्छेदकजातिमिति तत्वसाक्षात्कारेऽव्याप्तिः मानसावृत्तित्वेन जातेर्विशेषजीयत्वात्। मानसत्वं च जातिविशेषः इत्यास्तां विस्तरः। नास्तिकास्तु वैशिष्टयानवगाहि ज्ञानं साक्षात्कारः। अयं घटः इत्यादि ज्ञाने च साक्षात्कारत्वप्रत्ययो भ्रान्तिः घटत्वाद्यलीकविषयत्वात् इत्याहुः तन्न्। बाधकं बिना भ्रान्तित्वायोगात्। न च अलोकविषयत्वं बाधकम्? घटत्वादेरलीकत्वासिद्धेः।

स च साक्षात्कारो द्विविधः नित्योऽनित्यश्च। नित्यो भागवतः अनित्योऽन्यः।

अनित्यो द्विविधो निर्विकल्पकः सविकल्पकश्च। तत्र वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकं निष्प्रकारकं वा। तच्च यद्यपि न प्रत्यक्ष सिद्धम् अतीहिनयत्वाभ्युपगमात् तथापि अयं घटः इति विशिष्टज्ञानरूपकार्यानुमेयम्। तथाहि जन्य विशिष्टज्ञानं प्रति जन्य तद्विशेषणज्ञानं कारणमिति निर्विवादम्। भवति प्राथमिकम् अस्माकम् अयं घटः इति ज्ञानजन्यं घटत्वाविशिष्टज्ञानमस्ति विशेषणी भूत घटत्वस्य अज्ञानात्।

न च जन्मान्तरीयघटत्वविशिष्ट ज्ञानं तत्र कारणम्। अव्यवहितपूर्व[4] कात्यवर्तिनः एव विशेषणज्ञानस्य तत्र हेतुत्वात्। न च भागवतं ज्ञानं तज्जजनकं समानाधि करण प्रत्यासत्या तस्य हेतुत्वात्। भगवज्जानस्य व्यधिकरणत्वात्। नन्वस्तु घटत्वविशिष्टस्मरणमेव तत्र कारणम्। न च विशेषणज्ञानं विना तदेव विशिष्ट ज्ञानं कथमिति वाच्यम्? विशिष्टानुभवे हि शेषणज्ञानं कारणं न तु स्मरणेऽपि तेन बिना तदुत्पत्तेः अन्यथा अनवस्थानात्। अस्तु वा निर्विकल्पकं घटत्वस्मरणम् इति चेत्? न चैत्रत्वादिविशिष्ट बुद्धौ तदसंभवात्। न हि

चैत्रत्वादिकं पूर्वम् अनुभूतं यत: स्मरेत्। न च अनुभवं विनैव स्मरणं तस्रू तद्वेतुत्वात्।

किं च यत्र घटत्वं न स्मृतं तत्र विशिष्टज्ञानसामग्रयभावात् घटघटतत्वयो: साक्षात्कारसामग्रीत: साक्षात्कारोपपत्तौ न किञ्चिद् बाध कम् अस्ति। तदेव च अस्माकं निर्विकल्पकं ज्ञानम् इति संक्षेप: ननु विशेषणज्ञानस्य हेतुता सिद्धौ सर्वमतेदेवं स्यात्। तत्रैव यानं न पश्याम इति चेत् न अन्वयव्यति रेकाभ्यां तदवधारणात्। विस्तरस्तु मणिमरीथौ अनुसन्धेय:।

वैशिष्ट्यावगाहि सप्रकारकं वा ज्ञानं सविकल्पकम्। प्रकारता च अयं घट: इत्यादिज्ञाने विशेषणस्य घटत्वादेर्विशेषणत्वापरनामा विषयताविशेष: विषयता विषयाकार प्रतीतिसाक्षेक: स्वरूपसम्बन्ध विशेष:। पदार्थान्तरम् इत्येकदेशिन:।

भट्टास्तु ज्ञातो घट: इत्यादि प्रतीतेर्ज्ञानजन्यो विषय निष्ठ: प्राकट्यापरनामा पदार्थो ज्ञातता सैव च विषयता घटज्ञानयो: सम्बन्धरूपा। युक्तञ्चैतत् कथमन्यथा ज्ञानकर्मत्वं घटादे: क्रियाजन्यफलशालित्वभावादित्याहु:, तन्न विनष्टं घटे ज्ञात् इति प्रतीते: न हि तत्र ज्ञान किञ्चिज्जनयितुं शक्नोति। तस्यैव असत्वात्। न च समवायीकारण[5] विना भावकार्योत्पत्ति: संभवति, तत्र स्वरूपसम्बन्ध विशेष एव प्रतीते: विषय इति चेत् अन्यत्रापि स एव अस्तु कृतम् अधिकेन्। कर्म विभक्तेरपि तद्वदेव उपपत्तिरिति संक्षेप:। अन्येक्तु भासमान वैशिष्ट्य प्रतियागित्वं प्रकारत्वम् अयं घट: घटत्वस्य वैशिष्ट्यं भासते तत्प्रतियोगिघटत्वम् इत्याहु:। तन्। दण्डपुरूषसंयोगा इति समूहालम्बने दण्डी पुरूष: इतिवत् दण्डस्य प्रकारतापत्ते:। संयोगो हि दण्डस्य वैशिष्ट्यं भासते तत्प्रतियोगी च दण्ड इति दिक्।

तच्च प्रत्यक्षम् इन्द्रियात्मकं द्वेधा। द्रव्यग्राहकं च द्रव्यग्राह कानि चक्षुस्त्वङ्मनांसि अव्यद् घ्राणे रसनं श्रवणं च।

ननु मनसो द्रव्योग्राहकत्वे अन्धस्य अपि विप्रकृष्ट घटोपलब्ध्यापत्ति:। न च तदात्थमात्रग्राहं सर्वविषयत्व सिद्धानतव्यघातात् उच्यते मन: सर्वविषय कमपि बहिर्जन्यज्ञानविषये परतन्त्रम्। परं चक्षुराद्युपस्थिति: योगजधर्म: सामान्यलक्षणा च न पुन: चक्षुरादिमात्रम् स्मृत पदार्थानां मनसा संसर्गग्रहात् कथमन्यथा कविकाव्यादियोगिनां योगराजधर्मप्रत्यासत्या मनसा सर्वसाक्षा काराश्च।

प्रमेयत्व सामान्यलक्षणप्रत्यासत्या मनसा सर्वग्रहाच्चक्व तद्विमन: स्वतन्त्रम् अबाह्यवस्तूनि कानि अबाह्यानि आत्मा, तद्योग्यगुणा:, तद्भाव:, तद्वृत्तिर्जातिश्च। के तद्योगगुणा: 2. सविकल्पकज्ञानेच्छाप्रसत्नसुख दु:खद्वेषा: तदेकत्वपरिमाणे च तदेकत्व परिमाणे न योग्य इति टीकाकृत:। ननु इत्थं परात्मा परेण गृहयेत्। तद्गुणाश्च न परात्मतद्गुणानां परायोग्यवात् स्यादेतत्। चक्षुयेद्रिद्रव्यग्राहकं तदा परिमाणवादयोऽपि गृह्येरन् इति चेन्न तेषां चक्षुरयोग्यत्वात् किं तावत् चक्षुषो योग्यं महदुद्भूतवद् द्रव्यं परमाणुश्च न महान् आत्मादेश्च नरूपवन्त: पिशाचादे: नोद्भूतरूपवन्त:। तद्रपस्य स्यान्नुद्भुतत्वात्।

उद्भूतत्वं च जातिविशेष: इत्येके। अनुद्भुतत्वरूपजात्यभाव इत्यपरे योग्यगुणा: योग्यद्रव्यरूपतन्मात्रवृत्ति संख्यापरिमाणपृथक्त्वस्नेहसंयोगविभागपरत्वापरत्वद्रवत्ववेगा: मात्रपदं घटाकाशादिसंयोगवारणाय, कर्म च योग्यद्रव्यसमवेतं जातिस्तु योग्यवस्तुगता द्रव्यत्वरूपादि समवायश्च त्वचो महद् उद्भुतस्पर्शवत् योग्यद्रव्यम्। तेन परमाणु[6] वायुप्रदीपप्रभादय: त्वचा न गृहयन्ते। परमाणो अमहत्वात्। वायो: नीरूपत्वात्-प्रभाया: उद्भुतस्पर्शा भावात्। गुणाश्च। अत एव वायुपरिमाणादय: त्वचा न गृहयन्ते चक्षुरयोग्यत्वात्। न वा प्रदीपप्रभापरिमाणादय: उद्भुत स्पर्शवन्मात्रावृत्तित्वात् न वा घटप्रभासंयोगादय: उद्भुतस्पर्शवन्मात्रावृत्तित्वात् तत्र हि अनुद्भुतस्पर्शादयो विद्यन्ते कर्म च योग्यद्रव्य समवेतं सामान्यं च योग्यवस्तु समवेतं[7] समवायश्च।

इति न्यायसिद्धान्तमञ्जर्या:ऽनुसारेणप्रत्यक्षप्रमाणस्य निरूपणं।

## संदर्भ ग्रंथ

1. स्वरूप सम्बन्ध विशेष:
2. नित्यत्वे सति अनेकसमवेतत्वम्
3. अनिर्वचनीयोऽधर्म: स च क्लृप्त सप्त पदार्थातिरिक्त एव।
4. तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्।
5. न्यायसिद्धान्तमंजरी-डा.बलिरामशुक्ल- पृ.सं.-8
6. यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं - न्यायसिद्धान्तमंजरी - पृ.सं.11 डॉ. बलिरामशुक्ल
7. भोक्तुमशक्या अणव:।
8. समवायेन वृत्तिमान्।